Postal Regd.No. GAMC- 1553/2016-2018 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १३ अङ्क : १४५
जुन - २०१८

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2016-2018 issued by SSP Ahmedabad. Valid upto 31-12-2018. containing 8 pages ₹ 10

## चिन्तनम्

### ( अ ) सन्तुष्टः येन केनचित्

अद्यतनः मनुष्यः सङ्ग्रहवृत्त्या अभिप्लुतः दृश्यते। सः वित्तकोशस्य गुहायां निक्षिप्तं सुवर्णखण्डं प्रतिमासम् आघ्राय मोदते। जीवनस्य चरमेषु वर्षेषु सुखं द्रष्टुं धावन् सः नितरां दुःखीभवति। धनराशिः एव सुखस्य स्रोतः अस्ति इति भ्रमः मनसि आजीवनं श्लिष्यति। सर्वाणि इन्द्रियाणि संयम्य ज्ञानपूर्वकं नाणकानि गणयन् वणिक् स्वीयं जीवनं धन्यं मन्यते। वणिक् एव लुब्धः भवति ? नैव। वणिक् तु अस्मासु सर्वेषु विद्यमानस्य लोभस्य प्रतीकमात्रम् अस्ति। मोदकं ब्राह्मणेभ्यः एव रोचते इति न, इतरे जनाःअपि तद्दर्शनेन लालायन्ते।

लोभः नैकेषु गृहेषु वसतिं करोति। लेखकेषु वसन् लोभः पारितोषिकं काङ्क्षति। मुख्यमन्त्रिणि विराजमानः लोभः प्रधानमन्त्रिपदाय उत्सहते। तस्मात् लोभात् खलु गृहं प्रविष्टा नववधूः स्वामिनीपदं प्रतीक्षते। मनसः शून्यतां पूरयितुं मनुष्यः लोभं प्रति सरति। आन्तरिकी असमृद्धिः लोभस्य मूलम् अस्ति। लोभस्य स्वामी सन्तोषः अस्ति। यावत् सन्तोषस्य सूर्यः न उदेति तावत् एषा अन्धपरम्परा प्रवर्तते–

**लक्षाधिपस्तथा राज्यं राज्यस्थः स्वर्गमीहते ॥**

स्पृहा लोभस्य वल्लभा अस्ति। सा लोभम् अनुसरति। सैव शतिकं मनुष्यं सहस्रस्य स्वामी भवितुं प्रेरयति। ततः विद्यमाने गृहेऽपि अपरं गृहं क्रीयते। नानासंस्थासु शासनं कर्तुं मनः उत्कण्ठते। पदानाम् अभिज्ञापत्राणि वर्धन्ते। गृहोपकरणानां सम्मर्दः एव साफल्यस्य परमं प्रमाणं मन्यते। एवम्प्रकारेण मनुष्यस्य प्रच्छन्नं द्रारिद्रयं लोभस्य छिद्रात् बिन्दुशः गलति। गृहे विद्यमानं वस्तु नितरां न्यूनमेव दृश्यते। अनुश्रूयते यत् अक्षयपात्रं कदापि रिक्तं न भवति। परन्तु लुब्धकस्य पात्रे निक्षिप्तं सर्वं स्वल्पेन कालेन रिक्तं भवति। लुब्धकः अक्षते पात्रेऽपि छिद्रं कृत्वा हर्षम् अनुभवति। एतां कलां तु विरलाः मनुष्याः जानन्ति।

'ओशो' कथयति यत् कोऽपि मनुष्यः द्वयोः नौकयोः समकालम् उपवेष्टुं न शक्नोति। द्वयोः स्नानागारयोः स्नातुं न शक्नोति। जीवने आवश्यकवस्तूनि अनन्तानि वर्तन्ते। ततः न विरम्येत चेत् ऋजुजीवनस्य सौन्दर्यं ज्ञातुं न शक्यते। लोभः जीवनस्य सौन्दर्यं छिनत्ति। एतत् सर्वं जानन् अपि अस्मासु विद्यमानः शयालुः कुम्भकर्णः जागरितुं न इच्छति। सोऽपि एनेस्थेसियाप्रियः अस्ति !

सतीशः गज्जर्

# अस्माकम् आगामिकार्यक्रमा:

## Admission Open

- શું તમે સંસ્કૃત બોલવા માંગો છો ?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકીર્દિ બનાવવા માંગો છો ?

તો અહીં છે, એક તક

**એકલવ્ય સંસ્કૃત એકેડેમી** દ્વારા આયોજીત

**શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય**

**"Diploma In Sanskrit Teaching"**

માં ભાગ લો અને ઉત્તમ શિક્ષક બનો.

પ્રવેશપત્ર સ્વીકારવાની અંતિમ તારીખ ૩૧ ઓગષ્ટ ૨૦૧૮.

પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

અભ્યાસક્રમની વિશેષતા:

→ તાલીમ માટેનું ગુણવત્તાયુક્ત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા માર્ગદર્શન.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરો: **ડો. મિહિર ઉપાધ્યાય ૯૮૨૪૬૧૬૨૩૭**

## Value Education Through Sanskrit

### बालसंस्कारकेन्द्रम्
(Class SKg to 4)

### बालसंस्कृतशिबिरम्
(Class 5 to 8)

- **Date** : 10/06/18 to 14/04/19
- **Day** : Sunday
- **Time** : 11:00am to 12:30pm
- **Fees** : 3500/-
- **Venue** : Eklavya Sanskrit Academy, Core House, Opp. Apollo city centre, Nr. Parimal Garden, Ahmedabad - 380006
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

## स्तोत्रपाठः
(शिवपूजनम्, शिवमहिम्नः स्तोत्रं च)

**Date** : 03/07/18 to 31/07/18
**Day** : Tuesday, Thursday
**Time** : 6:30 pm to 8:00 pm

**Venue:** Core House, Off CG Road, Ah'bad
**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006